# Mahamrityunjayadhyanam

# મહામૃત્યુઞ્જયધ્યાનમ્

## Document Information

Text title : mahAmRRityunjayadhyAnam

File name : mahAmRRityunjayadhyAnam.itx

Category : shiva, dhyAnam

Location : doc_shiva

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# મહામૃત્યુઞ્જયધ્યાનમ્

હસ્તામ્ભોજ-યુગસ્થ-કુમ્ભયુગલાદુદ્ધૃત્ય તોયં શિરઃ
સિઞ્ચન્તં કરયોર્યુગેન દધતં સ્વાઙ્કે સકુમ્ભૌ કરૌ ।
અક્ષ-સ્રગ્-મૃગહસ્તમમ્બુજગતં મૂર્દ્ધસ્થચન્દ્રં સ્રવત્
પીયૂષોઽત્ર તનું ભજે સ-ગિરિજં મૃત્યુઞ્જયં ત્ર્યમ્બકમ્ ॥ ૧॥

ચન્દ્રોદ્ભાસિત-મૂર્દ્ધજં સુરપતિં પીયૂષપાત્રં વહદ્
હસ્તાબ્જેન દધત્ સુદિવ્યમમલં હાસ્યાયપઙ્કેરુહમ્ ।
સૂર્યેન્દ્વગ્નિ-વિલોચનં કરતલે પાશાક્ષસૂત્રાઙ્કુશા-
મ્ભોજં બિભ્રતમક્ષયં પશુપતિં મૃત્યુઞ્જયં સંસ્મરે ॥ ૨॥

સ્મર્ત્તવ્યાખિલલોકવર્તિ સતતં યજ્જઙ્ગમસ્થાવરં
વ્યાપ્તં યેન ચ યત્પ્રપઞ્ચવિહિતં મુક્તિશ્ચ યત્ સિદ્ધ્યતિ ।
યદ્વા સ્યાત્ પ્રણવત્રિભેદગહનં શ્રુત્વા ચ યદ્ ગીયતે
તદ્વસ્તુસ્થિતિ-સિદ્ધયેઽસ્તુ વરદં જ્યોતિસ્ત્રયોત્થં મહઃ ॥ ૩॥

ૐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્ મૃત્યોર્મુક્ષીય માઽમૃતાત્ ॥ ૪॥

ધ્યાયેન્નિત્યં મહેશં રજતગિરિનિભં ચારુચન્દ્રાવતંસં
રત્નાકલ્પોજ્જ્વલાઙ્ગં પરશુમૃગવરાભીતિહસ્તં પ્રસન્નમ્ ।
પદ્માસીનં સમન્તાત્ સ્તુતમમરગણૈર્વ્યાઘ્રકૃત્તિ વસાનં
વિશ્વાદ્યં વિશ્વબીજં નિખિલભયહરં પઞ્ચવક્ત્રં ત્રિનેત્રમ્ ॥ ૫॥

ઇતિ મહામૃત્યુઞ્જયધ્યાનં સમાપ્તમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Mahamrityunjayadhyanam*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*